नं. ४९५७ — ४९५८ — ४९५९
क. ख. ग.

क. देवीकवचस्तोत्र व्याख्या.
ख. अर्गलस्तोत्र विवरणम्.
ग. कीलक विवरणं

कर्ता क.ख.ग. श्रीनारायणभट्ट:

पत्रसं. १४ — सं. x

विषय: तन्त्रम्. एकस्मिन्नेव त्रीणि पुस्तकानि.

© Dharmartha Trust JK. Digitized by eGangotri

क देवीकवचस्तोत्र व्याख्या ५

ख अर्गलस्तोत्र विवरणम् ३

ग कीलकविवरणम् ३

४९५७ - ४९५९

4957 - 4959

14

Complete

© Dharmartha Trust JK. Digitized by eGangotri

इति टीका रामाश्रमाचार्य्यंकृता

© Dharmartha Trust JK. Digitized by eGangotri

ॐ नमः श्रीगणाधिपतये ॥ श्रीदुर्गाभगवत्यै नमः ॥ नमः सकलकल्याणभाजनाय पिनाकिने नमो लक्ष्मीनिवासाय दे-
वतायै गिरां नमः ममाहमिति कथ्यंते मोहिता यस्य मायया दुर्जेया यास्तैः सर्वैस्तं वंदे कमलापतिं २॥ श्रीकृष्णकृपया देवी
विद्यारूपेण भासते कृपया परमेशस्य विद्या सर्वजगन्मयी ३॥ क्वाहं मंदमतिः क्वायं समभाष्याख्यपार्णवः तथापि हरि-
णा दिष्टो ग्रहिष्येर्थमणिं वरं ४ रक्षीतेर्थमहारत्ने ग्रथिते टीकिकास्रजः हसंतु जना हृष्टा माहसंतु वराजनाः ५ अत्र सक-
ललोकहिताय आवतीर्णो भगवान्नारदः श्रीनारायणाकल्पयात दुर्गमपारायणाश्च स्वनाम्ना प्रकटितं पंचरात्राख्यागमोपि वि-
स्मायाचरितं ज्ञातमिच्छन्संसारिणां सर्वजनानां सर्वाभीष्टावाप्तये ७ विद्याकृतलक्ष्म्योर्मोहदुःखादि संतरणाय ब्रह्माण-

श्रीनारद उवाच यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणां यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह १॥

मपृच्छत् तदेव दर्शयति यद्गुह्यमिति हे पितामह ब्रह्मन्मे मह्यं तद्ब्रूहि कथय ननु किं तत्तुभ्यं ब्रवीमि यद्गुह्यं गोप्यं
अत्र लोके भुवने जने यथानर्हाय अनधिकारिणोल्पप्रज्ञात्तु व्याख्यामेव यं कमपि श्रावयंति स्वयमसंयमिनो ज्ञात प्र
भावा मंत्रपा किं हीनां अवंतीति यत्कस्यचिन्नाख्यातं परममत्युत्कृष्टं परात्युत्कृष्टा मा लक्ष्मीर्जनानां यस्मात्तं परमं प
राणां कलत्राणां मा लक्ष्मीर्यस्माद्वा परेषां शत्रूणां मा लक्ष्मीर्यस्मात्प्राप्यत इति शेषः परः शत्रुकलत्रपोरिति विश्वः
यद्वा परममेव चित्स्वरूपमेव एतदेवादिकरणमित्यर्थः यस्माद्वराणां हयग्रीवादीनां सर्वरक्षाकरं सर्वेभ्यः सत्वादि
भ्यो रक्षां करोतीति तत् केषां नृणां मनुष्याणां तत्सर्वं कस्यचिन्नाख्यातं न कथितं तन्मे ब्रूहीति प्रश्नः तत्र ब्रह्माधिकारि

© Dharmartha Trust JK. Digitized by eGangotri

ण्ं सिद्धिसंयोग्यं च ज्ञात्वा ॰ तिगोप्यमपि नारदायाह अस्तीति १ हे विप्र वेदार्थज्ञान नारद तद्गुह्यतममतिगोप्यमस्ति व
र्तते हे महात्मने तच्छृणुष्व किं तद्गोप्यतममस्ति यदेतावत्कालपर्यन्तं न कस्यचिदाख्यातमतिवीर्यवत्तरं देव्या विश्वमायायाः
कवचं यथा गात्रे कवचधारिणो जनस्य शस्त्रास्त्रकृतघातादिकं न भवति तथा देव्या बीजनामादिकवचधारिणः कृतवि
घ्नासमर्थस्य शस्त्रास्त्रभूतप्रेतपिशाचमंत्रापघातादिसर्वदुःखस्य रक्षाकरमेतत्कवचं सर्वभूतोपकारकं सर्वेषां भूतानां
जीवानामुपकारं करोतीति तत् पठनेन श्रवणेन वा सर्वाभीष्टकर्त्ता रोगविद्रावतीति भावः पुनः कथंभूतं पुण्यं पापविशेषदलो

श्रीब्रह्मोवाच॥ अस्ति गुह्यतमं विप्र सर्वभूतोपकारकं
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महात्मने २॥

के कृतपापस्य नाशकं परलोके सुखप्रदं मनोहरं वा हे महात्मने नारद नारं नरदुष्टपापसमुदायं द्यति कलहेन खंड
यति इति नारदः तेषां बहुजीवने पापसमुदायाच्चिरकालं नरकवासं दूरीकरोति कृपया साधूनामुपदेशाद्वा मोक्षमार्गं
नयति यतो महात्मा सर्वोपकारी मुनिश्रमणनशीलस्तस्मात उक्तं हे महात्मने महांश्चासौ मुनिश्चेति तथादौ श्रोस्तवकृत्सुध्य
यं देव्या बीजरूपाणि अष्टनामान्यादावेव कथयति पश्चाद्देव्याः कवचं तथादौ नामान्येव दर्शयति प्रथममिति
द्वाभ्यां २॥

© Dharmartha Trust JK. Digitized by eGangotri

दे॰ वी॰ क॰ २

प्रथममाद्यं नाम शैलपुत्रीति शैलस्य हिमालयस्य पुत्री सा मेनायामुत्पन्नत्वात् तदुक्तं भागवते एवं दाक्षायणी हित्वा सती
पूर्वकलेवरं जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम इति प्रथमं नाम बीजं शैलपुत्रीति १ द्वितीयं ब्रह्मचारिणी ब्रह्म त
पश्चरत्याचरति जानातीति यद्वा ब्रह्म तत्त्वं चरति जानातीति चर गतिभक्षणयोरित्यस्य गत्यर्थस्य धातोर्ज्ञानार्थत्वात् स
र्वे गत्यर्था ज्ञानार्था अपीत्युक्तत्वात् वेदस्तत्त्वं तपो ब्रह्मेत्यमरः अथवा ब्रह्म विष्णुः सदाजितः पूर्णकामत्वात् तं चरति
यातीति ब्रह्मचारिणी वैष्णवी शक्तिः यद्वा रुद्रः स्वात्मार्थे हकारस्वरवधाय भूत ब्रह्मचारिवेषत्वाद् ब्रह्मचारी कृष्णस्तस्येयं शक्तिः
तदुक्तं भागवते तं च भस्म करिष्यामि उपायेनापि दानवं त्वया भयं न कर्तव्यमस्मान्मे निर्भये जिरे इत्युक्त्वा स गतो विष्णु

प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी तृतीयं चण्डघण्टेति कूष्माण्डेति चतुर्थकं ३॥

र्बटुनामसमन्वितः कृष्णस्य सुहृदियात् सा वटुको योगमाययेति वटुकस्य ब्रह्मचारिणः श्रीकृष्णस्य शक्तिर्ब्रह्मचारिणी
ति द्वितीयं नाम बीजं २ तृतीयं नाम चण्डघण्टा चण्डः अत्यन्तकोपनो घण्टा यस्याः दन्ते दैत्यत्रासो यति सा चण्डस्त्वत्यन्तकोपन
इत्यमरः यद्वा चण्डे चण्डान् घण्टारयति हिनस्तीति सा घण्ट हिंसे इति कविकल्पद्रुमकामधेनुटीकायां चण्डघण्टेति तृतीयं
३ चतुर्थं नाम कूष्माण्डा कुः पृथिवी तस्या ऊष्मा तपो यस्मात् जीवानामुत्पत्तिरेवंभूतं अण्डं ब्रह्माण्डं यस्याः सा यद्वा कुः कु
त्सिता ऊष्मा आध्यात्मिकादितापो यस्मिंस्तदेवंभूतमण्डं यस्याः सा कुः पृथिवी समाख्याता कुः पापे कुत्सिते पि चेत्ये
कादक्षरनाममालायां ऊष्मा ऊष्मागमस्तपः इत्यमरः कूष्माण्डेति चतुर्थं नाम बीजं ॥४॥ ३॥

2

२

© Dharmartha Trust JK. Digitized by eGangotri

पंचमंनामस्कंदमाता स्कंदतिप्रादुर्भावंगोषयतीतिस्कंदः कार्तिकेयस्तस्यमाता स्कंदमातेतिपंचमंनामबीजं ५ षष्ठंनाम
कात्यायनी कात्यायनानिमार्गाःसंतियस्याःसा पृषोदरादित्वात्साधुत्वं यद्वाकेस्वर्गेभवाःकात्यादेवास्तानयतिगच्छतिरक्षार्थ
मितिकात्यायनी अथवा कात्यायनीतिषष्ठंनामबीजं ६ सप्तमंकालरात्री कालाग्रणामावासौरात्रिश्चसा आधिक्यात्दीर्घत्वं
यद्वाकालंमृत्युंरातिददातिकालरात्रिः यद्वाकालरात्रेर्मृत्योस्त्रायतिरक्षतिस्वभक्ताज्ज्ञानदानेनेतिकालरात्रिरितिसप्तमंबीजं
७ अष्टमंनाममहागौरी गौरवर्णत्वाद्गौरी यद्वा गुरते विवाहार्थं शिवेउद्यमंगच्छतीतिगौरी गुरीउद्यमे तदुक्तंभागवते तमेव
दयितंभूयआदृङ्क्तेपतिमंबिका अनन्यभावैकगतिंशक्तिःसुप्तमिवपूरुषं इत्यष्टमंनामबीजं महागौरी ८ ननुदेव्या अष्टौना

पंचमंस्कंदमातेतिषष्ठंकात्यायनीतिच सप्तमंकालरात्रेतिमहागौरीतिचाष्टमं ४ उक्तान्येतानिनामानिब्रह्मरौ
वमहात्मने अग्निनादह्यमानस्तु शत्रुमध्यगतोरणे ५ विषमेदुर्गमेचैव भयार्ताःशरणंगताः नतेषांजायतेकिंचि
दशुभंरणसंकटे ६॥

मानिकेनोक्तानि तत्राहोक्तानीतिद्वाभ्यां एतानिसर्वोक्तान्यष्टौनामानिब्रह्मणाकथितानि
कस्मैमहात्मने महतिकर्मेआत्मामनोयस्यतस्मैनारदायेतिशेषः महात्मनेतिपाठांतरे महात्मनेतिब्रह्मविशेषणं सर्वा
र्थःस्पष्टतरएव येनकेनप्रतिमूर्तवाक्यमपि बीजानिनारदायाद अष्टौब्रह्मामहात्मने सुगमानिमहादेव्याभक्ताविशेषतो
वितन्वति एतेषांनाम्नांमध्येयत्किंचिन्नाम येशरणंगतास्तेषांकिंफलमित्याह येशरणंगतास्तदाश्रयंप्राप्तास्तेषामशुभम
मंगलंनजायते नप्रादुर्भवति मंगलमेवभवतीत्यर्थः ननुकुत्राशुभं नजायते तत्राह रणसंकटे रणे संग्रामेयत्संकटंक
ष्टंतस्मिन् ननुकस्तनामाश्रयंगतास्तत्राह अग्निनादह्यमानाःसंतः पुनर्येरणे संग्रामे शत्रुमध्येगताः पुनर्विषमेविषम
स्थानेगताः पुनर्दुर्गमेस्थानेगताभयार्ताभयेनपीडितास्तेषांशरणंगतानांमंगलंभवत्येव ६॥

© Dharmartha Trust JK. Digitized by eGangotri

दे॰
वी॰ क॰
३

ननुयेदैत्यैः स्मृताभक्त्याकृत्वाकथंपश्यंतीत्याह नापदमिति येनापन्नेन आपन्मनासायेत्वाः पूर्वोक्ताः पौलङ्ग्यादयः स्मृता
स्तस्यापदंनपश्यंति आपदंदूरीकुर्वंतीत्यर्थः लघुनन्नूनंनिश्चितंसर्वदुःखभयंकरी पतासामपिपकापियैः स्मृतातेषांवृद्धिः
प्रकृष्टाजायतइति नस्येतितेकर्मणिषष्ठीवा आपत्प्रामस्यापदेनाशयंति स्मरणकर्तुश्च वृद्धिंप्रयच्छंतीत्यर्थः अतएताः पौ
लङ्ग्यादयोष्टौकवचस्यादावेवस्वकामावाप्तयेस्मरणीयाः नपश्यंतिनाशयंतीति णिजभावश्चार्षःवा तस्यभक्तस्यापदं वि
नापयकिंपश्यंतिन ॰ इदानींचामुंडायाः सप्तमातृः सवाहनाभक्ताभयायशस्त्रनाशायचनिर्दिशतिप्रेतसंस्थेतिद्वाभ्यां श
र्वीयाःसप्तमातरः शार्वीरुद्रोष्टमोयासुताः शार्वीयाः यद्वा शर्वस्यरुद्रस्येयंशक्तिः शार्वीसैवायाम्बस्यायासांताः जीवभावश्चा

नापदंतस्यपश्यंतिशोकदुःखभयंकरी यैस्तुभक्त्यास्मृतानूनंतेषांवृद्धिःप्रजायते ॰ प्रेतसंस्थातुचामुं
डावाराहीमहिषासना ऐंद्रीगजसमारूढावैष्णवीगरुडासना ॰ माहेश्वरीवृषारूढाकौमारीशिखि
वाहना ब्राह्मीहंससमारूढाशार्वीचाष्टैवमातरः ४॥

र्षः नापवदर्शयति चंडमुंडौ हतवती चामुंडातद्वि
तमग्रेवक्ष्यति कथंभूताचामुंडाप्रेतसंस्थाप्रेतेमृतकेसंतिष्ठतीतिसा १ वराहस्येयंशक्तिर्वाराही महिषएवा
सनंवाहनंयस्याःसामहिषासना २ ऐंद्रीइंद्रस्यशक्तिर्गजेसमारूढाऐरावणाश्रिता ३ विष्णोरियंवैष्णवीशक्तिः
गरुडएवासनंयस्याः ४ महेश्वरस्यरुद्रस्येयंशक्तिर्माहेश्वरीवृषारूढावृषभाश्रितासा ५ कौमारीकुमारस्य
कार्तिकस्येयंशक्तिःशिखिवाहनाशिखीमयूरएववाहनंयस्याःसा ६ ब्रह्मणइयंशक्तिर्ब्राह्मीहंससमारूढा
हंसहयाश्रिता ॰॥४ इदानींमातृणामाभरणानिआयुधानिचाह सर्वाभरणेति द्वाभ्याम्॥

३

© Dharmartha Trust JK. Digitized by eGangotri

सर्वेषां समस्तानां मुकुटादीनामाभरणानां याः शोभास्ताभिराढ्या युक्ताः अतिशयनिर्भरास्ताः नानारत्नैरनेकमणिभिरुप
शोभितास्ताः रथमारूढाः रथस्थिताः क्रोधेन समाकुला व्यग्राः शंखमित्यत्र खनत्यवदारयति खं उद्यति शाकृताभिति शंखः य
द्वा शं सुखं खनति ददाति खनेन स्वपक्षाणामिति शंखः खनु अवदारणे खनु दाने चक्रामतीति निक्षिपतीति शाकृनिति चक्रं
गदति रुजतीति शाकृनिति गदा शक्नोतीति शाकृन्नेतं समर्था भवतीति शक्तिः हलतीति विदारयतीति शाकृनिति हलं हल विलेखने
मुशपते खंड्यते शत्रुरनेनेति मुशलं तच्च तदायुधं च मुशलायुधं खेटा खंडने खेटं तविद्ये, टति गच्छति हस्ते रक्षार्थमिति खेट
कं तोमयति शाकृन दंड्यते नष्टह्नतीति तोमरं अयोग्रः काष्टदंडः शस्त्रविशेषः तवरेति भाषया प्रसिद्धः परान्शृणाकृष्टम्

सर्वाभरणशोभाढ्या नानारत्नोपशोभिताः दर्पितैरथमारूढा देव्यः क्रोधसमाकुलाः ॥१॥ शंखं चक्रं गदां शक्तिं
हलं च मुशलायुधं खेटकं तोमरं चैव परशुं पाशमेव च ॥२॥ कुंतायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमं दैत्यानां देह·
नाशाय भक्तानामभयाय च ॥३॥ धारयंत्यायुधानीत्थं देवानां च हिताय वै ॥४॥

ति हिनस्तीति परशुः
शूहिंसायां पाश
ति बध्नाति शाकृननेनेति पाशः पाशबंधने ॥ कुणति शब्दं करोति शत्रुवेहने इति कुंतः स चासावायुधं च तत्, अत्यतोमर
शस्त्रविशेषायुधं कुंते त्याकर्षणशस्त्रं त्रयः शूलायस्मिन्निति त्रिशूलं शूल रोगे शृणातनूकरणे वा शृंगाभ्यां निर्मितं शा
र्ङ्गं धनुः देव्यः एतान्यायुधानि धारयंति अयमनेन प्रकारेण ननु किमर्थं धारयंति तत्राह दैत्यानां देहनाशार्थं मायुधा
नि धारयंति भक्तानामभयदानार्थं चेत्यमायुधानि धारयंति (भक्तानामभयदानार्थं चेत्यम) हितायाभिलषितफला
वाप्तये भक्तानां देवतानां चेति संबंधः ता देव्यो रक्षार्थं प्रार्थनीया इति देवीं संबोधयन्प्रार्थयेदिति दर्शयन्नाह ॥४॥

© Dharmartha Trust JK. Digitized by eGangotri

दे. क. टी. ४

महाबले इति महद्बलं यस्याः सा महाबला तत्संबुद्धौ हे महाबले महान्कायो यस्याः सा तत्संबुद्धौ सर्वत्र महाकाये महद्भ
यं विनाशयितुं शीलमस्या महाभयविनाशिनी तत्संबुद्धौ हे महाभयविनाशिनी दीव्यति क्रीडति द्योतते रोचते सर्वत्रेति
देवी इति प्रोक्ता तत्संबुद्धौ हे देवि दुःखेन बहुतपश्चादिकृच्छ्रेण प्रेप्स्यते, वा लोकयते सङ्केतेति दुष्प्रेक्षा तत्संबोधने हे दुष्प्रे
क्षे शत्रूणां विपक्षाणां भयं वर्धयतीति भयवर्धिनी तत्संबोधने हे भयवर्धिनि दुर्गे एवमेतादृशगुणोपेता मामुपासकं
त्राहि पालयेति सर्वमात्मरक्षासम्प्रार्थनानन्तरं दिग्रक्षामाह प्राच्यामित्यादि १७ प्राच्यां पूर्वस्यां दिशि ऐन्द्री शक्तिर्मां र॰

५

महाबले महाकाये महाभयविनाशिनि त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि १७ प्राच्यां रक्षतु मामैन्द्री
आग्नेय्यामग्निदेवता दक्षिणस्यां तु वाराही नैरृत्यां खड्गधारिणी १५ प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवा
हिनी उदीच्यां चैव कौमारी ईशान्यां शूलधारिणी १८ ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद्वैष्णवी तथा एवं दशादि
शो रक्षेच्चामुण्डा शववाहना ॥

रक्षतु आग्नेय्यामग्निदिशि मामग्निदेवता रक्षत्विति शेषः दक्षिणस्यां वा॰
राही वराहशक्ती रक्षतु खड्गधारिणी नैरृत्यां दिशि रक्षतु १५ वारुणी वरुणशक्तिः प्रतीच्यां पश्चिमायां दिशि
रक्षेद्रक्षतु आशिषि विधिसंभावनासु विधानात् मृगवाहिनी वायव्यां दिशि रक्षेत् कौमारी स्कन्दशक्तिरुदी॰
च्यामुत्तरस्यां दिशि शूलधारिणी रुद्रशक्तिरीशान्यां दिशि रक्षत्विति शेषः १८ ब्रह्माणी ब्रह्मशक्तिरूर्ध्वमुपरिभागे॰
मे मम रक्षतु ब्रह्माणी मे रक्षेदिति पाठस्तृतीये त्वरे दीर्घत्वमार्षं तथा तेन प्रकारेण वैष्णवी विष्णुशक्तिरधस्तादधःस्था
ने रक्षतु अव्ययत्वात्सार्वविभक्तिकत्वं एवमनुना पूर्वोक्तप्रकारेण चामुण्डा शववाहना दशदिशः प्रतिरक्षतु १९॥

© Dharmartha Trust JK. Digitized by eGangotri

एवं दशदिक्षु रक्षार्थं देवीः संप्रार्थ्येदानीं वक्तव्यभागेषु समीपे देवीः स्थापयितुं प्रार्थयति तत्र केषांचिदेवी दूरे स्थितेति बुद्धिस्तेषां
रक्षार्थमाह जयेत्यादिना जयतीति विजयस्याः प्रसादादिति जया सा मेऽग्रतो अग्रभागे स्यात्तिष्ठतु स्यादिति प्रयोगः अर्थः मे
मम पृष्ठतः पृष्ठभागे विजया स्यात् विशेषेण जयति यस्याः प्रसादादिति विजया तथा न केनापि जिताः जिता वामपार्श्वे वा
मभागे स्यात् न कदाचित्पराजयो भंगो जातो यस्याः सा तु तथा अपराजिता सा दक्षिणभागे रक्षतु १८ एवं देवीः समीपे स्थाप्य केषां
केनैकेन संप्रार्थ्येदानीं निजांगरक्षार्थं देव्या नामभिः शिखाप्रभृतिषु अंगेषु कवचं करोति शिखामित्यादिना उद्योतयति प्र
काशयति लोकान् समये स्वस्थैर्येणोद्योतनी शिखां रक्षेद्रक्षतु शिखां चूडां प्रवर्तिः रक्षति भक्तानिष्टुमा यद्वा उमेति सत्यादिति

जयामे चाग्रतः स्यात् विजया स्यात्तु पृष्ठतः अजिता वामपार्श्वे तु दक्षिणे चापराजिता १८ शिखामुद्योतनी रक्षेदुमा
मूर्ध्नि व्यवस्थिता मालाधरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी १९ त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके शंखि
नीचक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी २०॥

भेदकत्वात् यद्वा उमेति रक्षां मातिमानयति प्रतिवेनेतुमा उकारः
शंकरः प्रोक्तः अस्येकान्ते नाम मालायां मा उमाने उमा मूर्ध्नि मस्तके व्यवस्थिता मालाधरेति मालाधरी मुंड
मालां संग्रामे हतानामिति शेषः सा ललाटे स्थिता भवत्विति शेषः यशो विद्यते यस्याः सा यशस्विनी भ्रुवौ भ्रूद्व
यं रक्षेद्रक्षतु १९ त्रीणि नेत्राणि यस्याः सा त्रिनेत्रा भ्रुवोर्मध्ये रक्षतु नासिके यमघंटा रक्षतु यम नियमने शंखवत्
स्याः अस्तीति शंखिनी चक्षुषोर्नेत्रयोर्मध्ये रक्षतु द्वारे राजद्वारे वासो विद्यते यस्याः सा द्वारवासिनी रक्षतु श्रोत्रयोः
कर्णयोर्द्वयोर्मध्ये वास इति शेषः २०॥



© Dharmartha Trust JK. Digitized by eGangotri

दे० क० टी० ५

कलयति पीडयति दैत्यानिति कालिका यद्वा कलयति प्रेरयति जनान् धर्मेति कपोलौ गण्डौ कल्लः संख्यानेऽमी कल्लदेशे पांसुरवर्णं करोमीति प्रीयत इति कस्य प्रीतिः पद्मकस्य कर्णमूले रक्षतु कर्णमूले कर्णमूलं ग्रामनो वागयः पाति देवताः नासिकायां रक्षतु चर्चिका उत्तरोष्ठे च चर्चिका अभीष्टसिद्धये जने ॥ कलानां षोडशभागः अमृतस्य कला षोडशो भागो यस्याः सा अमृतकला यद्वा अमृतं कलयति गणयति संख्यापयति भक्तेभ्यस्तत्त्वामिति अमृतकला सा

कपोलौ कालिका रक्षेत् कर्णमूले तु शांकरी नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ॥ अधरे चामृतकला जिह्वायां च सरस्वती दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका ॥ घण्टिकां चित्रघण्टा च महामाया च तालुके कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमङ्गला ॥१८॥

अधरे ओष्ठे रक्षतु सरः प्रसरणे वियते यस्याः सा सरस्वती जिह्वायां रक्षतु कौमारी यां मारयति दैत्यजनानिति कौमारी समस्यं तत्पदे अलुक्समासः यद्वा कुमारस्य कार्तिकेयस्येयं शक्तिः दन्तान् रक्षतु रदना दशना दन्ता इत्यमरः चण्डयति कुप्यति दैत्यानिति चण्डिका कण्ठदेशे कण्ठस्थाने रक्षतु चण्डिका कण्ठमध्ये इति पाठः ॥ चित्रा अद्भुता घण्टा यस्याः सा चित्रघण्टा घण्टिकां गलशुण्डिकां रक्षत्विति शेषः मीयते जनैरिति माया महती चासौ माया चेति महामाया सा तालुके रक्षतु कामानि कमनीयान्यक्षाणि अक्षीणि यस्याः यद्वा कामाः अक्ष्णोः यस्याः सा कामाक्षी चिबुकं मध्याधोदेशं रक्षतु अधः स्याद्वामिदिदि सूताङ्गे कर्ष चके व्यवहारे कलिर्मेध इत्यमरः सर्वेषां मङ्गलं कल्याणं यस्याः सा सर्व

© Dharmartha Trust JK. Digitized by eGangotri

भद्रं कल्याणं कलयति प्रेरयति भक्तेभ्य इति भद्रकाली यद्वा भद्रा चासौ काली श्यामा चेति सा ग्रीवायां शिरोधरायां रक्ष-
तु धनुर्धरतीति धनुर्धरी पृष्ठवंशे रक्षतु नीला श्यामा ग्रीवा यस्याः सा नीलग्रीवा बहिःकण्ठे रक्षतु कण्ठे बहिः कण्ठे नल-
कूबरस्य कुबेरपुत्रस्येयं शक्तिः नलकूबरी णित्वाभाव आर्षः सा नालिकां कण्ठनाडीसमुदायं रक्षत्विति शेषः २४ खड्गं
धरतीति खड्गधारिणी उभौ स्कन्धौ रक्षतु मे मम बाहू वज्रधारिणी रक्षतु दण्डोऽस्या अस्तीति दण्डिनी हस्तौ करौ दण्डोऽस्त्री लगुडे
पि स्यादित्यमरः अम्बते कुनयति सर्वमित्यम्बिका यद्वा अम्बति गच्छति जानाति सर्वमित्यम्बिका अङ्गुलीश्च रक्षतु अम्ब गत-
तौ गत्यर्थस्य धातोर्ज्ञानार्थत्वात् २५ शूलस्य शूलाख्यास्त्रस्येश्वरी स्वामिनी नखान् रक्षतु नलो वंशसदृशो हृदादिषु

ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी नीलग्रीवा बहिःकण्ठे नालिकां नलकूबरी २४ खड्गधारिण्युभौ स्कन्धौ बाहू १२
मे वज्रधारिणी हस्तौ मे दण्डिनी रक्षेदम्बिका चाङ्गुलीस्तथा २५ नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेन्नलेश्वरी स्तनौ र-
क्षेन्महादेवी मनःशोकविनाशिनी २६ हृदये ललितादेवी उदरे शूलवासिनी नाभिं तु कामिनी रक्षेद्गुह्यं गुह्ये-

नलस्तस्येश्वरी स्वामिनी नलेश्वरी यद्वा नलो नलोऽग्निस्तस्येश्वरी नलेश्वरी कुक्षौ रक्षतु अत्राकाराभाव आर्षः बाहुमूले कुक्षि-
कक्षोऽस्त्यमरः महती चासौ देवी महादेवी स्तनौ कुचौ रक्षतु शोकं विनाशयति भक्तानामिति शोकविनाशिनी मनो रक्ष-
तु २६ ललति विलसति संसारे इति ललितादेवी हृदये रक्षतु शूले विषदे वस्त्रे वस्ते आच्छादयतीति शूलवासिनी य- १२
द्वा शूले सशुद्धज्ञानो न्वलेवसतीति शूलवासिनी उदरे उदरविषये रक्षतु कामोऽभिलाषो विद्यते यस्या भक्तरक्षायामिति का-
मिनी यद्वा कमति दीव्यति प्रकाशते लोके इति कामिनी नाभिं रक्षतु गुह्यं गुह्येन्द्रियं तस्येश्वरी स्वामिनी भगस्येश्वरी भगं रक्षत्विति

© Dharmartha Trust JK. Digitized by eGangotri

दे॰
क॰ टी॰
९

भूतानां नाथा भूतनाथा मेऽङ्घ्रिं श्रियं रक्षतु महिषं वोढुं शीलं यस्याः सा महिषवाहिनी उदरे स्तनयुगे रक्षतु भग
मैश्वर्यादिषड्गुणं विद्यते यस्याः सा भगवती उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति
स्त्रीलिङ्गत्वाद्भगवती ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा भगवती
कट्यां कटिदेशे रक्षतु मेघं वोढुं शीलं यस्याः सा मेघवाहिनी ऊरू ऊरुप्रदेशौ मे मम रक्षतु जानुभ्यां विन्ध्यवासिनीति
पाठान्तरे विन्ध्याचले वसितुं शीलं यस्याः सा जानुभ्यां जानुनी रक्षतु श्रवकर्मा चक्रवर्ती २८ मदहन्त्री यस्याः सा महाबला
जङ्घे रक्षतु विशेषेण नयति प्रापयति नीतिमार्गे जनानिति विनायकी यद्वा वीनां पक्षिणां नायको गरुडस्तस्येयं शक्ति

भूतनाथा च मेऽङ्घ्रिं मे उदरे महिषवाहिनी कट्यां भगवती रक्षेदूरू मे मेघवाहिनी २८ जङ्घे महाबला रक्षेज्जानू म-
ध्ये विनायकी गुल्फयोर्नारसिंही च पादपृष्ठे च तैजसी २९ पादाङ्गुलीः श्रीधरी च पादौ च स्थलवासिनी नखा-
न्दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ३०॥

विनायकी गणेशस्तस्येयं विनायकी
गलेशं संबन्धिनी शक्तिर्जानुमध्ये
रक्षतु गतो माव श्राद्धः नरसिंहस्येयं शक्तिर्नारसिंही सा गुल्फयो रक्षतु विशेषेण तेजयति प्रकाशयति विश्वमिति
तेजो विष्णुस्तस्येयं शक्तिस्तैजसी पादपृष्ठे पादयोः पृष्ठे रक्षतु २९ श्रियं शोभां धरति निजाङ्गे इति श्रीधरी पाद
अङ्गुलीः पादयोरङ्गुलयस्ता रक्षतु स्थले वसितुं शीलं यस्याः सा स्थलवासिनी पादौ चरणौ रक्षतु पादयोः स्थलवासिनी
ति पाठः दंष्ट्राभिः कराली भयानका यद्वा दंष्ट्राभिः करे दंष्ट्रैः स्यात्तति दृश्यन्ति चैत्यानिति दंष्ट्राकराली सा नखान्रक्ष
त्वात्रक्षतु ऊर्ध्वकेशान्विद्यते यस्याः सा ऊर्ध्वकेशिनी यद्वा ऊर्ध्वाः सन्ति केशाः यस्याः ऊर्ध्वकेशानामीशितुं शीलं यस्याः सोर्ध्वकेशि

९

© Dharmartha Trust JK. Digitized by eGangotri

कौमारी रोमाणां कूपेषु रक्षतु कौमार्या अर्थः प्रागुक्तः तथा तेन प्रकारेण वागीश्वरी वाचामीश्वरी त्वचं मे रक्षतु पर्वाणि
पाषाणग्रंथयस्ते संति यस्मिन्स पर्वतो हिमाचलस्तस्य पुत्री पार्वती रक्तं च मज्जा च वसा च मांसं च तत् रक्तमज्जावसामांसं हृहेसं
ग्रस्थीनि च मेदांसि च तान्यस्थिमेदांसि पार्वती रक्षतु ३१ कालरात्र्या निरुक्तिः पूर्वमुक्ता आंत्राणि रक्षतु मुकुटस्थे ईश्वरी मुकु
टे ईश्वरी यद्वा मुकुटेनेश्वरी स्वामिनी पित्तं धातुविशेषं रक्षतु पद्मं कमलं विद्यते यस्याः सा पद्मावती सर्वपद दीर्घ आर्षः य
द्वा पद्मा लक्ष्मी विद्यते यस्याः सा पद्मकोशो हृदयकमलभांडारं रक्षतु चूडायां शिखायां मणिर्मणिवत्सर्वोपरि विराजमा

रोमकूपेषु कौमारी त्वचं वागीश्वरी तथा रक्तमज्जावसामांसमस्थिमेदांसि पार्वती ३१ अंत्राणि कालरात्रीश्च पित्तं च
मुकुटेश्वरी पद्मावती पद्मकोशे कफे चूडामणिस्तथा ३२ ज्वालामुखी नखज्वालमभेद्या सर्वसंधिषु शुक्रं
रक्षेद्ब्रह्माणी छायां छत्रेश्वरी तथा ३३ अहंकारं मनो बुद्धिं धर्मं च धर्मचारिणी प्राणापानौ तथा व्यानं स
मानोदानमेव च ३४ ॥

ना कफे कफविकारे रक्षतु ३२ ज्वाला अग्निज्वाला मुखे यस्याः सा ज्वालामुखी
नखानां नाडिकानां जालः समूहस्तं रक्षतु न भिद्यते भेदकैः शस्त्रादिभिरित्यभेद्या सर्वसंधिषु सर्वे समस्ताश्च ते संध
यश्च शरीरस्येति तेषु शुक्रं बीजं ब्रह्माणी रक्षतु तथा तेन प्रकारेण छत्रमातपत्रं तस्येश्वरी छत्रेश्वरी छायां रक्षतु
छायां देहप्रतिबिंबं यद्वा छायां कांतिमनातपं छाया सूर्यप्रिया कांतिः प्रतिबिंबमनातपश्चेत्यमरः ३३ धर्मगुणं चरि
त्रमाचरितुं शीलं वा शीलं यस्याः सा धर्मचारिणी वरुणाति भक्तानयोः धर्मग्राहेन चित्तं अत्यंतः करण वक्त इंद्रियं धर्मचा
रिणी रक्षतु हृदि प्राणो गुदे पानः समानो नाभिसंस्थितः उदानः कंठदेशेस्याद्व्यानः सर्वशरीरगः ३४ ॥

© Dharmartha Trust JK. Digitized by eGangotri

दे॰
कं॰टी॰
८

वज्रं हस्ते यस्याः सा वज्रहस्ता प्राणानां कल्याणे विधिः तं सुशोभनं रसं मे मे रक्षतु योतयति प्रकाशयति योगिनी रसरूपा-
दिकं रक्षतु ... नाम्ना ... रसनेन्द्रियमाश्रयो यस्य यद्वा नाराः आपः अयनमाश्रयो यस्येश्वरस्य स नारायणस्तस्येयं प्र-
क्तिर्नारायणी आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः सत्त्वं सत्त्वगुणं प्रति रजो
रजोगुणं प्रति तमस्तमोगुणं प्रति मां रक्षत्विति शेषः सदा सर्वदा सर्वकाले वा वाराहमाविष्कृतिः स्वीकृता देवाराहि वं मे
मम आयुर्जीवितकालं रक्ष वैष्णवी विष्णुशक्तिः धर्मं रक्षतु ३६ चक्रमस्या अस्तीति चक्रिणी तया आदीनां प्रशंसा यशो दाना-

वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ३५ सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी
सदा आयुर्मे रक्षतु वाराही धर्मं रक्षतु वैष्णवी ३६ यशः कीर्तिं च लक्ष्मीं च सदा रक्षतु वैष्णवी चक्रिणी ऐन्द्री गोत्रं च मे रक्षेत्
पशून्मे रक्ष चण्डिके ३७ पुत्रान्रक्षेन्महादेवी भार्यां रक्षतु भैरवी पन्थानं विपथा रक्षेन्मार्गं क्षेमकरी तथा राजद्वारे
महालक्ष्मीर्विजया सर्वतः स्थिता रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु तत्सर्वं रक्ष मे देवी जयन्ती पापनाशिनी ॥

दीनां प्रशंसा कीर्तिर्लक्ष्मीं संपदं सदा सर्वदा रक्षतु ऐन्द्री इन्द्रशक्तिः मे मम गोत्रं कुलं रक्षेत् रक्षतु पशून् ... चण्डिके त्वं रक्ष ३७
महती या सा महादेवी पुत्रान् रक्षेत् बिभ्यति दैत्यजना यस्याः सा भैरवी भैरवो रुद्रस्तस्येयं शक्तिर्वा भैरवी भार्यां पाणिगृहीतां रक्षि
रक्षतु पन्थानं साधुपथिकसेवितमार्गं विपथः असत्यासादिजनसेवितमार्गं वा क्षेमंकरी रक्षेत् ३८ महती या सा लक्ष्मीश्च
महालक्ष्मी राजद्वारे रक्षतु विशेषेण जयति शत्रूनिति विजया सर्वतः सर्वस्मादुपाधिभ्यः स्थिता स्थिरा ३९ तु पुनर्यद्रक्षारहि-
तं स्थानं भवति कवचेन च वर्जितं स्यात्तत्स्थानं सर्वं पापनाशिनी जयन्ती रक्षतात् रक्षतामिति प्रयोग आर्षः शुभार्थं कवचस्य नित्य-

॥ ४ ॥ [illegible]

© Dharmartha Trust JK. Digitized by eGangotri

इदानीं सर्वत्र रक्षार्थं दुर्गां संबोध्य प्रार्थयते रक्षेति हे दुर्गे मे मम सर्वगात्राणि अनुक्तानि रक्ष कथं भूतासि दुर्गापहारिणी दुर्ग
म पहरतीति दुर्गापहारिणी तत्संबुद्धौ हे दुर्गापहारिणि अस्य प्रत्यवत्तनयानि र्दिशाति यतस्त्वमेवं भूता अतस्त्वमेव सर्वगात्रा-
णि उक्तान्यनुक्तानि रक्षेत्यर्थः ४० सर्वकामामप्येकवचधारणं निर्दिशन्नाह पदमिति यथात्मनः स्वस्य शुभं मंगलमिच्छ
न्कवचेन रहितः कवचेनानाहतः पदमेकमपि न गच्छेत् कवचेनाहतः कृतरक्षोयत्र यत्र हि निश्चयेन गच्छति तत्र तत्र सर्वा
न्कामानवाप्नोति इति कवचधारणादितिशेषः अर्थलाभे यत्न लाभः निश्चितं च विजयः सर्वाः कामिकाः कामनायः

रक्ष मे सर्वगात्राणि दुर्गे दुर्गापहारिणि ४० पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ४१ कवचेनाहृतो नि
त्यं यत्र यत्र हि गच्छति तत्र तत्रार्थलाभश्च विजयः सर्वकामिकः ४२ यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितं
परमैश्वर्यमतुलं प्राप्नोति विपुलं पुमान् ४३ निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः त्रैलोक्ये च भवेत्पूज्यः
कवचेनाहृतः पुमान् ४४ इदं तु देव्याः कवचं देवानामपि दुर्लभं यः पठेत्प्रातरुत्थाय नित्यं संयतः श्रद्धयान्वितः

स्मिन्नेवं भूतो विजयः प्राप्यते इत्यादि फलसिद्धये कवचधारणमिति शेषः ४२ यं यं कामं मनोवांछितं चिंतयते तं तं नि
श्चितं प्राप्नोति अतुलमसममपि विपुलं बहुलं मेश्वर्यं प्राप्नोति ननु भूतले एवमैश्वर्यादिकं प्राप्नोति परं निर्भयो न स्यात्तत्रा
ह निर्भय इत्यादि ४३ निर्भयो भयरहितो मर्त्यो मनुष्यो जायते संग्रामेषु परैः शत्रुभिर्जितो न भवति ननु तर्हि पूज्यो न स्यात्त
त्राह त्रयाणां लोकानां समाहारस्त्रैलोक्यं तस्मिन्पुमान्पूज्यो भवति यतः कवचेनाहृतः ननु तर्हि देवीकवचं सुलभं
स्यात्तत्राह त्रयाणां लोकानां हमिति ४४ इदं देव्याः कवचं देवानामिंद्रादीनामपि दुर्लभमसुलभं यो भाग्यवशात्प्राप्नुयात्स किमा

कवचटीकास॥

दे॰
क॰ टी॰
८

देवीति देवानामियं देवी कलातस्य भवति साकुतो जायते तत्राह यतस्त्रैलोक्येऽपराजितः ननु स्य देवीकवचस्य पाठकः कति
वर्षाणि जीवेत्तत्राह जीवेदित्यादि साग्रं समग्रं संपूर्णं वर्षशतं जीवेत्सामान्याद्वयेन कथंभूतः सज्जीवेत्तत्राह अपमृत्युविवर्जितः अ
पमृत्युना परमायुरतिरिक्तविपरीतमरणेन वर्जितो रहितः जलसर्पादिभिस्तस्य मरणं न स्यादित्यर्थः ननु यदि रोगैर्व्याप्तो भवेत्त
र्हि किं बहुवर्षजीवनेन तत्राह न श्यंतीति ४५ सर्वे सकला व्याधयो रोगा नश्यंति तत्राह लूतेत्यादि लूत्वं तिष्ठिदति शरीरं त्वच
मिति लूताः लूता छेदने विस्फोटकौ रक्तविकारविशेषश्चादिर्येषां नतु विस्फोटकादयो यदि नश्यंति तर्हि न श्यंतु विषं न नश्यत
तत्राह यत्स्थावरं हलाहलमाहरुद्रं जंगमं सर्पादिदंशोद्भवं कृत्रिमं मद्यफेनतैलाद्युद्भवं यत्तत्सर्वमेवं ज्ञातीयं विषं न श्यति ४६

देवीकलाभवेत्तस्य त्रैलोक्ये चापराजितः जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ४५ नश्यंति व्याधयः सर्वे
लूताविस्फोटकादयः स्थावरं जंगमं चैव कृत्रिमं चापि यद्विषं ४६ अभिचाराणि सर्वाणि मंत्रयंत्राणि भूतले
भूचराः खेचराश्चैव कुलजाश्चोपदेशिकाः सहजाः कुलजा माला डाकिनी शाकिनी तथा ४७॥

भूतले पृथिवीतले सर्वाण्यभिचारकृतानि शत्रुभिर्विहितानि मंत्रयंत्राणि न श्यंति न केवलमेतदेव नश्यंति किंत्वन्ये पी
त्याशंक्याह भूचरा इत्यादि भुवि चरंति गच्छंतीति भक्षयंतीति वा भूचराः खगाति भक्षणयोः खे आकाशे चरंति गच्छंति भक्षयंतीति वा खे
चराः कुले जायंते इति कुलजाः उपदेशे भवा उपदेशिकाः सहजायंत इति सहजाः अकुले जायंत इत्यकुलजाः सहजाश्च ते अकु
लजाश्चेति सहजाकुलजाः माल्यंते धार्यंत इति मालाः तदाकारः मलमलद्द्भूतौ भभैरवं भयानकं डः स्वं विषयतेयस्यां सा
डाकिनी सम्यं हरदहनौ चेद्धमंडले डः डकारो व्यसने पिचेति विश्वः डकारो भैरवे प्रोक्तो डकारो व्यसने पिच डकारः स्वरसत्रा
स्यात तत्तत्क्रेचायशुदाशस्तत इत्येकाक्षरीयशाकोति समर्था भवति जनान्हंतुमिति शाकिनी इत्यादयोपि न श्यंति किं वान्येपीत्या ॥ ८

अंतरिक्षेत्यादि अंतरिक्षे चरंति गच्छंतीति भक्षयंतीति वांतरिक्षचराः घुरयंति भीषयंति जनानिति घोराश्च घुरभीमार्थशब्दयोः
आप्रपाणस्ते दिव्यकं कुररवं विद्यते यस्या लोकार्थमित्याप्रपाकिनी कथंभूता महद्बलं वीर्यं यस्याः सा गृह्णंति लोकान् छलेनेति ग्रहाः
भवंति नानारूपेण जनेष्विति भूताः पिशं मांसमंचयंति इकनं यत्यभ्यवहारार्थमिति पिशाचा वाः अंशुगति पूजनयोः यद्वा पि
शितं मांसमश्नाति भुंजते इति पिशाचा वाः पृषोदरादीनि यथोपदिष्टमित्यत्र पृषोदरादित्वात्सिद्धं यक्षंते दंसंति भक्षयंति वा
जनानिति यक्षाः यक्ष भक्षदंसनयोः गां गानं धारयंतीति वा गंधर्वाः रक्षंति यज्ञेभ्य इति राक्षसाः रक्षपालने तेच तेच
ते चेति यक्षाद्कर्मधारयः ४९ ब्रह्मणएपपतेवाब्रह्मणश्चामीराक्षसाः वा विकल्पे नैते कक्षुरवर्णा मासमंततो लांति गृह्णं

अंतरिक्षचरा घोरा शाकिनी च महाबला ग्रहभूतपिशाचाश्च यक्षगंधर्वराक्षसाः ४९ ब्रह्मराक्षसवेता
लाः कूष्मांडभैरवादयः नश्यंति दर्शनात्तस्य कवचे हृदि संस्थिते ५० मानोन्नतिर्भवेद्राज्ञो तेजोवृद्धिकरं
परं यशसा वर्धते सोपि कीर्तिमंडितभूतले ५१॥

तीति वेतालाः विशकर्बुरक ल्माषशबलेताश्चकर्बुरेइत्यमरः
तेच तेते चेति ब्रह्मराक्षसवेतालाः कौ पृथिव्यां ऊष्मा यस्मादेवंभूतमंडं बीजं येषां ते कूष्मांडाः कूष्मांडफलाकाराः
स्वरूपाणा वा नन्वेते कदा नश्यंतीत्याह कवचे देवीकवचे हृदये संस्थिते सति ५० राज्ञा भूपतिना करणेन मानोन्नति
र्भवेत् तेजसः परं वृद्धिकरं कवचधारीयशसा वर्द्धते वृद्धो भवति वृधुवृद्धौ यद्वा स कवचधारी यशसा परं प्रकृष्टं वर्ध
ते छिन्नत्ति तेशतिदीयते वा वर्धड् छेदने छिदः राज्ञामिति पाठे राज्ञां नृपाणां मध्ये मानोन्नतिर्भवति मानेन नादंका
रेणोन्नतिः उच्च कीर्तिमंडितभूतले कीर्त्या मंडितं च तद्भूतलं च तस्मिन् ५१॥

© Dharmartha Trust JK. Digitized by eGangotri

दे॰
क॰ टी॰
५

तद्गुरुदैवकवचं कृत्वा चंडीदेवीं जपेत् कां चंडीमित्याह सप्तशतीं सप्तशतानि श्लोका मार्कंडेयपुराणोक्ता यस्यास्तां न
वरात्रपाठकस्य किं यत्कालपर्यंतं फलं भवेत्तत्राह यावदिति यावत्कूर्मः कच्छपदेवो धरां भूमिं धत्ते धरतीति कथंभूतां सशैल
वनकाननां शैलाः पर्वताश्च वनानि जंगलानि च काननानि विपिनानि च तथा तैः सह वर्त्तते इति तथा तां जीवनं भुवनं वन
मित्यमरः तावन्मेदिन्यां पृथिव्यां तस्य संततिस्तिष्ठति पुत्रपौत्रकी पुत्राणां पौत्राणां चेयं पुत्रपौत्रकी नवरात्रपाठकः कवच
पाठको वा देहान्ते किं प्राप्नोतीत्याह देहान्ते इति ५२ सुरैर्देवैरपि दुर्लभं दुष्प्रापं तत्स्थानं परमं परात्परं कुत्र शमालक्ष्मीर्यस्मिंस्तद्दे

१

जपेत्सप्तशतीं चंडीं कृत्वा तु कवचं पुरा यावत्कूर्मो धरां धत्ते सशैलवनकाननां तावत्तिष्ठति मेदिन्यां सन्त
तिः पुत्रपौत्रकी ५२ देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभं प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ५३
इति श्रीब्रह्मोक्तं देवीकवचस्तोत्रं संपूर्णम् ॥

ॐ वमित्यर्थः तदुक्तं भा गवते वैकुंठः कल्पितो येन लोको लो
कनमस्कृतः रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया कस्मात्तत्राह महामायाप्रसादतो महामायायाः प्रसादा
त् प्रसादस्तु प्रसन्नतेत्यमरः हरिभुवनदामनृपः प्रसादस्तस्मात् यथामतिस्तयाद्देवीकवचार्थं हृदकविः प्रा
र्थयेन्मतिमान्धीरस्तत्पदावामयेशुचिः १ इपार्वति महामाये विसोर्नाम सहस्रके रतिमे भाषितं भूपाय यथाते
सनपायिनी २॥ इति श्रीनारायणमहर्विरचिता देवीकवचस्तोत्रटीका संपूर्णतिशुभं भूयात् ॥

© Dharmartha Trust JK. Digitized by eGangotri

ॐनमश्चिदुरसंदेव्यै ॥ ॐ यशोदानंदिनी यस्य भगिनी प्रोच्यते बुधैः तत्कृपापादेन ब्रह्मादावर्गलाविहतिं ब्रुवे १ महा
मायाप्रसादतइति परमस्थानप्राप्तिश्रवणान्मद्रामायामेवतन्नामभिः स्मरन्नमस्करोति जयंतीत्यादिना जयत्युत्कर्षे
णावर्ततइतिजयंती मग्यतेगम्यतेभक्तैरितिमंगला मगिगतौ अतःकालमाह यतोभद्रकालीभद्रंकल्याणंकलयतिस्वज
तिभक्तानामिति तदपिकृतस्तत्राह यतःकपालिनीकंस्वर्गंपालयितुंशीलंयस्याःसाकपालिनी दुःखेनगम्यतेप्राप्य
तेज्ञायतेवाजनैरितिदुर्गा गत्यर्थस्यज्ञानार्थत्वात् क्षमतेभक्तानामपराधमितिक्षमा पृथिवीरूपेत्यर्थः शमयतिभक्त
पापमितिशिवा शमतेःशिवादेशः दधातिविश्वमुदरेइतिधात्री स्तुष्टछोभनंयस्यास्तयाश्राहूयतेजनैर्यज्ञाग्नाविति

ॐ जयंतीमंगलाकालीभद्रकालीकपालिनी दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते १ मधुकैटभ-
विद्रावविधातृवरदेनमः रूपंदेहिजयंदेहियशोदेहिद्विषोजहि २॥

स्वाहा स्वेआत्मनि दधातिजनैःश्राद्धेदत्तमि-
तिस्वधा यतएवंभूतात्वमसि अतस्तेतुभ्यंनमोस्तुभवतु १ मधुश्चकैटभश्चतयोर्विद्रावोरणेपलायनंतेनविधात्रे
ब्रह्मणेवरंददातीति रणात्पलायनंकारयतीति तत्संबोधने हेमधुकैटभविद्रावविधातृवरदेतुभ्यंनमः देवींनत्वा॰
किंप्रार्थयेतत्राह रूपमित्यादि रूपंसौंदर्यंजयं यतःऊतत्रिस्पराजयाभावं यशःसार्वत्रिकीतपोदानादिप्रशंसारूपांच
कीर्तिंदेहिप्रयच्छमह्यमुपासकायेतिशेषः अत्रयशःकीर्त्योरवांतरविशेषोनाश्रितः अतिप्रबलपातुसद्भावेकिंरू
पादिप्राप्त्याप्रयोजनमितितत्राह द्विषःशत्रून्जहि नाशयेति ॥ २॥

© Dharmartha Trust JK. Digitized by eGangotri

दे॰ अ॰ टी॰ १०

महिषासुरस्य दैत्यविशेषस्य निर्नाशो वधस्तेन विधात्रे ब्रह्मणे सुखं ददातीति हे महिषासुरनिर्नाशविधातृसुखदे य
द्वा महिषासुरस्य निर्नाशं विदधाति करोतीति महिषासुरनिर्नाशविधात्री अत एव जगत्त्रयस्य सुखदा सा चासौ सा चेति
पश्चात्कर्मधारयः तस्या आमंत्रणं पूर्ववत् हे देवि तुभ्यं नमः ३ रक्तं रुधिरमेव बीजं उत्पत्तिकारणं यस्य स रक्तबीजोऽसु
रविशेषस्तस्य वधो नाशो यस्यास्तत्संबोधने हे रक्तबीजवधे चंडश्च मुंडश्च तौ विनाशयतीति तत्संबोधने हे चंडमुंडवि
नाशिनि ते तुभ्यं नमः ४ निशुंभश्च शुंभश्च तयोर्निर्नाशः तेन विधात्रे ब्रह्मणे वरान्मनोरथान्ददातीति तत्संबुद्धौ हे नि

10

महिषासुरनिर्नाशविधातृसुखदे नमः रूपं दे॰ ३ रक्तबीजवधे देवि चंडमुंडविनाशिनि रूपं देहि॰ ४ नि
शुंभशुंभनिर्नाशविधातृवरदे नमः रूपं देहि॰ ५ अचिंत्यरूपचरिते सर्वशत्रुविनाशिनि रूपं देहि॰ ६
वंदितांघ्रियुगे देवि देवसौभाग्यदायिनि रूपं देहि॰ ७ नतेभ्यः सर्वदा भक्त्या चंडिके दुरितापहे रूपं देहि॰ ८॥

शुंभनिर्नाशविधातृवरदे यद्वा निशुंभशुंभनिर्नाशविधात्री चासौ वरदा चेति कर्मधारयः तस्या आमंत्रणे एतादृ
शि हे देवि तुभ्यं नमः ५ अचिंत्यान्यतर्क्याणि चरितानि यस्याः सा सर्वाञ्छत्रून्विनाशयति भक्तनिमित्तं तत्संबोधनं
सर्वत्र पूर्ववत् ६ वंदितं स्तुतमभिवादितं वांघ्रियुगं चरणद्वयं यस्यास्तत्संबोधने हे वंदितांघ्रियुगे देवानां सौभाग्यं
शोभनमैश्वर्यं ददातीति तत्संबोधने हे देवसौभाग्यदायिनि ७ हे चंडिके दुरितानि पापान्यपहरंतीति तत्संबोधने हे
दुरितापहे केभ्यः सर्वदा नतेभ्यः प्रणतेभ्यः प्रणतानां जनानां षष्ठ्यर्थे चतुर्थी ८॥

© Dharmartha Trust JK. Digitized by eGangotri

हे चंडिके व्याधिं नाशयतीति व्याधिनाशिनी तत्संबुद्धौ व्याधिनाशिनि केभ्य इत्याह भक्तिपूर्वं यथा स्यात्तथा त्वां स्तुवद्भ्यः
स्तुवतां भक्तानामित्यर्थः षष्ठ्यर्थे चतुर्थी ९ हे चंडिके देवि इहास्मिन्संसारे भक्तितो भक्त्या ये त्वामर्चयंति पूजयंति तेषां रू
पमित्यादि देहीत्यन्वयः यत्तदोर्नित्यसंबंधात् १० सुष्ठु शोभनं च तद् भगं च तस्य भावः सौभाग्यं भगं श्रीकाममाहात्म्य
वीर्ययत्नार्ककीर्तिष्वित्यमरः न विद्यते रोगो यस्य सोऽरोगः तस्य भाव आरोग्यं परमत्युत्कृष्टं सुखमानंदं देहि ११ हे देवि
द्योतनात्मिके कल्याणं विधेहि कुरु विपुलां बहुलां श्रियं लक्ष्मीं च विधेहि कुरु १२ सुराणामसुराणां च शिरोरत्नैर्मुकु

स्तुवद्भ्यो भक्तिपूर्वं त्वां चंडिके व्याधिनाशिनि रूपं० ९ चंडिके सततं ये त्वामर्चयंतीह भक्तितः रूपं देहि० १०
देहि सौभाग्यमारोग्यं देहि देवि परं सुखं रूपं० ११ विधेहि देवि कल्याणं विधेहि विपुलां श्रियं रूपं १२
सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके रूपं १३ विद्यावंतं यशस्वंतं लक्ष्मीवंतं जनं कुरु रूपं देहि १४॥
प्रचंडदैत्यदर्पघ्ने चंडिके प्रणताय मे रूपं १५ चतुर्वक्त्रे चतुर्वक्त्रसंस्तुते परमेश्वरि रूपं देहि १६॥
कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके रूपं० १७॥

टमणिभिर्निघृष्टौ चरणौ य स्यास्तत्संबोधने हे अंबिके
रूपमित्यादि १३ विद्या विद्यते यस्मिन्स विद्यावान् तं यशो विद्यते यस्य स यशस्वान् तं लक्ष्मीर्विद्यते यस्य स लक्ष्मीवान् तं लक्ष्मी
वंतं जनं कुरु भक्तलोकं १४ प्रचंडा अत्यंतकोपना ये दैत्यास्तेषां दर्पं गर्वं घ्नंतीति तत्संबोधने हे प्रचंडदैत्यदर्पघ्ने दे
वि प्रणताय मे मह्यं रूपमित्यादि देहि १५ चत्वारि वक्त्राणि मुखानि यस्य तेन चतुर्वक्त्रेण ब्रह्मणा संस्तुते परमा चा
सावीश्वरी च तत्संबोधने हे देवि रूपमित्यादि देहि १६ हे देव्यंबिके सदा सर्वदा कृष्णेन शश्वद्भक्त्या स्वकार्यार्थं

© Dharmartha Trust JK. Digitized by eGangotri

दे॰ संस्तुते तदुक्तं भगवता अर्चयिष्यन्ति मनुष्यास्त्वां सर्वकामवरेश्वरीं धूपोपहारबलिभिः सर्वकामफलप्रदामिति रू
अ॰ टी॰ पमित्यादि प्रार्थना १७ न केवलं कुलेनैव स्तुता यावद्ब्रह्मादिभिरपीत्याह हिमाचलेत्यादि हिमाचलस्य सुता पार्वती
११ तस्या नाथो रुद्रस्तेन संस्तुता तत्संबोधने हे परमेश्वरि रूपमित्यादि १८ इन्द्राण्याः पुलोमजायाः पत्याः पतिर्भर्ता शक्र
स्तेन कृतो सद्भावेन भक्त्या पूजिता तत्संबोधने हे रूपमित्यादि १९ हे देवि प्रचण्डौ दोर्दण्डौ ययोस्ते ते या भीदैत्यास्तेषां द
र्पं गर्वं विनाशयितुं शीलं यस्यास्तत्संबोधने हे प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि रूपमित्यादि देहि २० हे देवि भक्तजना

हिमाचलसुतानाथसंस्तुते परमेश्वरि रूपं देहि १८ इन्द्राणीपतिसद्भावपूजिते परमेश्वरि रूपं देहि १९॥
देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि रूपं देहि २० देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके रूपं देहि २१॥
पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीं तारिणीं दुर्गसंसारसागरस्य कुलोद्भवां २२॥

नामत्युत्कृष्टो भक्त आनन्दोदयो यया सा भक्तजनोद्दामदत्तानन्दोदया सा चासौ अम्बिका चेति कर्मधारयः तत्संबुद्धौ
हे दुर्गे रूपमित्यादि देहि २१ पत्नीं भार्यां मनोरमां सुन्दरीं मनसो वृत्तं चरितं मनोवृत्तमनुसर्तुं शीलं यस्यास्तां मनोवृत्तानु
सारिणीमिति पाठान्तरे मनोवित् मनोज्ञानं तस्य भावो मनोवित्ता तामनुसर्तुं शीलं यस्यास्तां स्वगतौ गत्यर्थ दे॰
स्य यातोर्ज्ञानार्थत्वात् तारिणीं तारयति पातिव्रत्यधर्मेण पतिं तत्कुलं च पितृकुलं च तया तां कस्य तारिणीं दुर्गसंसा अ॰
रसागरस्य कुलोद्भवां दुर्गश्चासौ संसारसागरस्तस्य तारिणीं कुले सत्कुले सद्वंशे उद्भव उत्पत्तिर्यस्यास्तां सत्कुलोद्भवां टी॰
११

© Dharmartha Trust JK. Digitized by eGangotri

नन्वेतदर्गलाख्यं स्तोत्रं पठित्वा किं पठेत्तत्राह इदमिति नरो जन इदमर्गलाख्यं स्तोत्रमादौ पठित्वा तु पुनः महा-
स्तोत्रं सप्तशती संख्यां सप्तशतिकाख्यं देवीस्तोत्रं पठेत् श्लोकानां सप्तशती संख्या यस्य तत् श्लोकसप्तशती संख्यं
श्लोकसप्तशतसंख्यमिति पाठान्तरे ह्रस्वत्वमार्षं यद्वा श्लोकसप्तशतसंख्यमिति पाठः तत्र सप्तशतानि संख्या यस्य त
त् सर्वपदे अलुक्समासश्चार्षः ननु पाठकः किं लभेत्तत्राह वरं श्रेष्ठं संपदः वरं प्राप्नोति वरं मनोरथं वा २२ व्याख्यातं

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः स तु सप्तशतीसंख्यं
वरमाप्नोति मानवः २२ इत्यर्गलस्तोत्रं संपूर्णम् ॥

दिमया स्तोत्रमर्गलाख्यं यथामति नत्वा देवीं विष्णुमायां प्रार्थये मोदवृत्तये १ ब्रह्मणा विष्णुना चैव शंभुना स्वार्थ-
सिद्धये स्तुता शक्रादिभिर्देवैर्ऋषिभिस्तत्त्वदर्शिभिः २ पुराणवेदसिद्धान्तप्रमाणव्यस्तनिष्ठभागमैः श्रीकृष्णचर-
णांभोजे भक्तिं मह्यं ददातु सा ३ ॥ इति श्रीअर्गलस्तोत्रविवरणं संपूर्णम् ॥

© Dharmartha Trust JK. Digitized by eGangotri

दे·
की·टी·
१२

ॐ नमस्त्रिपुरसुंदर्यै ॥ ॐ देवकीगर्भसंभूतायैकानंदप्रादहरेःप्रिया तद्व्याख्यातंदृष्टिंनत्वाकीलकंविवृणोम्यहं १॥
तत्रादौमुनिःसर्वविघ्नोपशांतिपूर्वकभुक्तिमुक्तिफलावाप्तयेश्रीदेवीशक्तिमाहात्म्यंसंस्तूयेदानींशिवंनमस्करोतिविशु
द्धेत्यादिना सोमार्धंचंद्रार्धंयद्वाललाटेधृतंयस्यससोमार्धधारी शिवस्तस्मैनमः। कथंभूतायविशुद्धंनिर्मलंज्ञा
नमध्यात्मलक्षणंयस्यैतादृशोदेहःसकलशरीरंयस्यतस्मैविशुद्धज्ञानदेहाय त्रयाणांवेदानांसमाहारस्त्रिवेदी
सैवदिव्यानिचक्षूंषिनेत्राणियस्यतस्मै पुनःकथंभूताय श्रेयःप्राप्तिनिमित्ताय श्रेयोमोक्षःप्राप्तिरिहलोकेनायासे

। विशुद्धज्ञानदेहायत्रिवेदीदिव्यचक्षुषे श्रेयःप्राप्तिनिमित्तायनमःसोमार्धधारिणे । १ सर्वविघ्नविनाशनं
नंमंत्राणामपिकीलनं सोपिक्षेममवाप्नोतिसततंजाप्यतत्परः २॥

न धनार्जनं यत उक्तं श्रीयाज्ञवल्क्येन हिवि
यं निःश्रेयसमैहिकंपारलौकिकंचेति श्रेयस्यप्राप्तिःश्रेयःप्राप्तिः तयोर्निमित्तंकारणंयःश्रीमहारुद्रस्तस्मैनम
इति नत्वाउक्तोरुद्रायनमस्कारस्तत्राह यतोरुद्ररूपंसमस्तसंज्ञंस्तोत्रंसर्वकार्यार्थेनिमंत्रयामासेतिपंचमेनान्वयः
१ सर्वेषांविघ्नानांविनाशनाययःश्रीमहारुद्रो मंत्राणांप्राक्साधितमंत्राणां कीलनंबंधनंकृतवान् सर्वविघ्नवि
नाशनार्थं अपीतिनिश्चये एवंभूतंश्रीमहारुद्रंयोनमस्करोति सक्षेममवाप्नोति यःसततंनिरंतरं जाप्यतत्परः
सोपिक्षेमंकल्याणमवाप्नोति २ ननुजापकस्यैतावदेवफलंस्यात्किंवान्यदपीतितत्राह सिद्ध्यंतीत्यादि ३॥

12

१२

© Dharmartha Trust JK. Digitized by eGangotri

एतेन समग्रजातसंख्येन स्तोत्रेण देवीं स्तुवतां पुंसां सकलानि वस्तूनि सिध्यंति सिद्धानि भवंति कानि तानीत्याह उच्चाटना
दीनि स्वकृतानि सिध्यंति परकृतानि कीलितानि बद्धानि भवंतीत्यर्थः ३ एतत्समग्रजातसंख्यं स्तोत्रं विना मंत्रौषध
मन्यद्वा यत्किंचिच्छुभाशुभं तत्सर्वं न सिध्यति येन समग्रजातसंख्येन स्तोत्रेण सर्वमुच्चाटनादि सिध्यति अतः कीलक
पूर्वकं समग्रजातीपाठः कर्तव्यः ४ लोके संसारे इमां समग्रां संपूर्णां कामाल्लभिष्यंति प्रापयिष्यंति अपि सिद्ध्य
तीति पाठांतरे सिध्यंति सिद्धा भवंति मंत्रादयो नेनेति कृत्वा हरो रुद्रः सर्वं समग्रमेवमनेन प्रकारेण इदं समग्रजातसं॰

सिद्धं मुच्चाटनादीनि वस्तूनि सकलान्यपि एतेन स्तुवतां नित्यं स्तोत्रपाठः प्रसिध्यति ३ न मंत्रो नौषधं तत्र न किं॰
चिदपि सिध्यति विनेतत्सिध्यते येन सर्वमुच्चाटनादिकं ४ समग्रामालभिष्यंति लोकयंकामिमां हरः कृतानि मंत्रया
मास सर्वमेवविधं शुभं ५ स्तोत्रं वै चंडिकायास्तु तच्च गुप्तं चकार सः समाप्तोऽयं स पुण्येन तं यथावन्निमंत्रणं ६ सोपि क्षे
ममवाप्नोति सर्वमेव न संशयः कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ७॥

एवं स्तोत्रं शुभं मंगलका विनिमंत्रयामास गुप्तं
वाचयामास सर्वकामार्थसिद्धय इति शेषः ... गुप्तेति देव दर्शयति स्तोत्रमित्यादिना सश्रीमहारुद्रस्तच्चंडिकायाः स्तो
त्रं गुप्तं गोप्यं चकार सोऽयं पाठको जनः पुण्येन समाप्तः संपूर्णं यथावन्निमंत्रणं जप्यादिकं कुर्यात्तं देवी संपूर्णफलं करोतीति य
स्तु पादमात्रं कुर्यात्तस्य किं फलं स्यादित्याह सोपीत्यादि ६ स पाठकः सर्वक्षेमं प्राप्नोति प्रकटोच्चारणादपि स पाठः कदा
कार्य इत्याह कृष्णायामिति कृष्णायां च पक्षे शुक्लायामपि चतुर्दश्यां तथाष्टम्यामपि यतः समाहित एकाग्रचित्तः देव्य
र्थं यो ददाति यः प्रतिगृह्णाति तस्य प्रयत्नवतः सिद्धिर्नान्यस्येत्याह ददातीत्यादि ७॥

© Dharmartha Trust JK. Digitized by eGangotri

दे·
की·टी·
१५
13

योऽत्र कर्ददाति यश्च शिष्यः प्रतिगृह्णाति तयोर्दानप्रतिगृहीत्रोरेषा देवी समग्रा तीप्रसीदति प्रसन्ना भवति अन्यथाः न्यति यैषा यथाकथंचिद्विधिं विनाग्रहणेन मिथ्या न सिद्ध्यतीत्यर्थः तर्हि कथं सिद्धिमायातीत्याह इत्थमिति इत्थमनेनाशकारेण रूपेण भेदेन कीलेन कीलनेन महादेवेन श्रीरुद्रेण कीलितं बंधनं कृतमिति यतोऽस्याः कीलक एवं पाठात्सिद्धिः फलं च अनन्तस्तदेवाह यो निष्कीलामित्यादि ८ यः इमां नित्यं सर्वदा सुस्फुटं सुप्रकटं यथा स्यात्तथैनां समग्रां तीं जपति मंत्रादिना ध्यं करोति स गंधर्वो गंधर्वदेवता वने जायते प्रादुर्भवति कथं जपति तदाह निष्कीलां कीलकरहितां पुनः विधाय श्रीदेवीकीलकपाठं कृत्वेत्यर्थः ननु वने एकाकी यदि जायते तदा किं प्रभुत्वमिति तत्राह स सिद्धः सिद्धज्ञाति

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति इत्थंरूपेण कीलेन महादेवेन कीलितं ८ यो निष्कीलां विधायैनां
नित्यं जपति संस्फुटं स सिद्धः स गणः सोऽपि गंधर्वो जायते वने ९ न चैवाप्यटतस्तस्य भयं क्वापि जायते ना
पमृत्युवशं याति मृतो मोक्षमवाप्नुयात् १० ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ततो ज्ञात्वैव संपन्ना
मिदं प्रारभ्यते बुधैः ११

देवैः सह वर्तते इति सगणो गणैर्देवैः संघैः सह वर्त्तत इति तथासः अस्य पाठकस्य फलांत
रमप्याह न चैवेत्यादि ९ तस्य जापकस्य यत्र कुत्राप्यटतोऽपि भयं न जायते न प्रादुर्भवति किंचान्यत् अपमृत्युवशं ना
याति अस्यायुर्न स्यात् अथ मृतः सन् मोक्षं गतो भवेत् अतो विधिपूर्वमेवास्याग्रहणमित्यर्थः १० ज्ञात्वा एवोक्तफले श्रुतिं
बद्ध्वा प्रारभ्य कुर्वीत अस्याः पठनारंभं पाठादिकं यः कुर्यात् स न विनश्यति अकुर्वाणस्तु विनश्यति पाठादिकमकुर्वा-
णो विनाशं ऽः एवं जन्ममरणादिकं च प्राप्नुयात् ततः संपन्नां संपूर्णां मा देवीं ज्ञात्वानंतरं प्रारभ्यते बुधैः प्राज्ञैः ११

© Dharmartha Trust JK. Digitized by eGangotri

की॰
ल॰ टी॰
१४

जनेमनुष्ये तल्लना च तद्रूपता सौभाग्यादि च यत्किंचिद्दृश्यते तत्सर्वं तत्प्रसादेन तस्याः प्रसादेन ततो हेतोरिदं समस्तं जाप्यं जा
प्यं शुभं मंगलोत्पादकं सद्भक्तैः सर्वदा कार्यं मंगलायनमद्भुतमित्युक्तत्वात् १२ अस्मिन्स्तोत्रे पठनेन कैर्वा जप्यमाने किं स्या
दित्याह पठनेनेत्यादि पठनेन इदं मंदसत्त्वैः रतिशयेनास्मिन्स्तोत्रे जप्यमाने मतिः स्तोतुः स्तवनो जनस्य संपूर्णा संपद्भवति
ततस्तस्मात्कारणात् जाप्यं प्रारभ्य मारंभणीयमेव निश्चितं १३ तस्याः प्रसादेनैश्वर्यं विभूतिः सौभाग्यारोग्यसंपदः शत्रुना
शश्च परो मोक्षो मुक्तिश्च भवति अतः सात्त्विकैः सत्त्वगुणोपेतैर्देवैर्जनैर्वा स्तूयते दुर्गेति शेषः ऐश्वर्यं यत्प्रसादेनेति पाठे

14

सौभाग्यादि च यत्किंचिद्दृश्यते ललनाजने तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभं १२ पठनेन तु जप्यमानेस्मिन्
स्तोत्रे संपत्तिरुच्चकैः भवत्येव समग्रापि ततः प्रारभ्यमेव हि १३ ऐश्वर्यं तत्प्रसादेन सौभाग्यारोग्यसंपदः श
त्रुहानिः परो मोक्षः स्तूयते सात्त्विकैर्जनैः १४ इति श्रीकीलकस्तोत्रं संपूर्णम् ॥ ॥

स्तूयते सा न किं जनैरिति च पाठे यस्याः दुर्गायाः प्रसादेन सर्वमैश्वर्यादि भवति सैवंभूता श्रीभवानी जनैर्भक्तैतरलोकैः
किं न स्तूयते अपि तु स्तूयत एवेत्यर्थः इदानीं यथामति कीलकं विहाय टीकाकारः प्रार्थयते १४ त्वत्प्रसादान्महेशानि
देवि सर्वमैश्वर्यमुद्भवेत् ममभूयात्तदैश्वर्यं त्वत्पादाब्जसेवनात् १ ॥ इति श्रीभट्टनारायणविरचितं की
लकविवरणं सम्पूर्णम् ॥ ॥

© Dharmartha Trust JK. Digitized by eGangotri

© Dharmartha Trust JK. Digitized by eGangotri